## बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्। (११३/८५२)

स्वाङ्गवाची यः सक्थिशब्दः अक्षिशब्दश्च तदन्तात् बहुव्रीहेः षच् प्रत्ययो भवति [1]समासान्तः। अयमर्थोऽभिप्रेतः। सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि। दीर्घं सक्थि यस्य दीर्घसक्थः[2]। कल्याणाक्षः। लोहिताक्षः। विशालाक्षः। बहुव्रीहौ इति किम्? परमसक्थिः। परमाक्षिः। सक्थ्यक्ष्णोः इति किम्? [3]दीर्घजानुः। सुबाहुः। स्वाङ्गात् इति किम्? दीर्घसक्थि शकटम्। स्थूलाक्षिः इक्षुः। टचि प्रकृते षज्ग्रहणं स्वरार्थम्। [4]चक्रसक्थी स्त्री। दीर्घसक्थी स्त्री। 'सक्थं चाक्रान्तात्' (६.२.१९८/३९३२) इति विभाषयोत्तरपदस्य [5]अन्तोदात्तता विधीयते। तत्र यस्मिन् पक्षे नास्त्युदात्तत्वं तत्र ङीपि सति उदात्तनिवृत्तिस्वरस्याभावादनुदात्तः श्रूयेत। ङीषि तु सर्वत्रोदात्तः सिद्धो भवति। बहुव्रीहिग्रहणम् आ पादपरिसमाप्ते[6]रनुवर्तते॥

## अङ्गुलेर्दारुणि। (११४/८५३)

अङ्गुलिशब्दान्ताद् बहुव्रीहेः षच् प्रत्ययो भवति [7]समासान्तः दारुणि समासार्थे। द्व्यङ्गुलं दारु। त्र्यङ्गुलं दारु। पञ्चाङ्गुलं दारु। अङ्गुलिसदृशावयवं धान्यादीनां [8]विक्षेपणकाष्ठमुच्यते। यस्य तु द्वे अङ्गुली प्रमाणं दारुणः तत्र तद्धितार्थ (२.१.५१/७२८) इति समासे [9]कृते तत्पुरुषस्याङ्गुलेः (५.४.८६/७८६) इत्यचा [10]भवितव्यम्। दारुणि इति किम्? पञ्चाङ्गुलिर्हस्तः॥

## द्वित्रिभ्यां ष मूर्ध्नः। (११५/८५४)

द्वित्रिभ्यां परो यो मूर्धन्शब्दः तदन्ताद् बहुव्रीहेः [11]षप्रत्ययः भवति समासान्तः। द्विमूर्धः। त्रिमूर्धः। [12]द्वित्रिभ्याम् इति किम्?[13] उच्चैर्मूर्धा॥

## अप् पूरणीप्रमाण्योः। (११६/८३२)

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः [14]शब्दाः पूरणीग्रहणेन गृह्यन्ते। प्रमाणी इति स्वरूपग्रहणम्। [15]पूरण्यन्तात् प्रमाण्यन्तात् च बहुव्रीहेः अप् प्रत्ययो [16]भवति समासान्तः। कल्याणी पञ्चमी आसां रात्रीणां ताः कल्याणीपञ्चमा [17]रात्रयः। कल्याणीदशमा रात्रयः। स्त्री प्रमाणी एषाम् स्त्रीप्रमाणाः कुटुम्बिनः। भार्याप्रधानाः इत्यर्थः।

[६४२] अपि प्रधानपूरणीग्रहणं कर्तव्यम्। (म.भा. २.४४६)

यत्रान्यपदार्थे पूरणी अनुप्रविशति न केवलं [18]वर्तिपदार्थ एव, तत्र पूरण्याः प्राधान्यम्। पुंवद्भावप्रतिषेधेऽपि प्रधानपूरण्येव गृह्यते। इह न भवति, कल्याणी पञ्चमी अस्मिन् पक्षे कल्याणपञ्चमीकः पक्षः इति।

[६४३] नेतुर्नक्षत्र उपसङ्ख्यानम्। (म.भा. २.४४२)

---

1. समासान्तः नास्ति क.फ. 2. गौरसक्थः इत्यधिकम् क.ड.ह. 3. दीर्घबाहुः क.ड. 4. चक्रसक्थी नास्ति ड, लघुसक्थी क. 5. अन्तोदात्तत्वम् क. 6. इति इत्यधिकम् ब.क.ड. 7. समासान्तः नास्ति ह. 8. विक्षेपणकाष्ठादिः ह. 9. कृते नास्ति क. 10. नित्यं इत्यधिकम् ड. 11. षच् फ. 12. द्वित्रिभ्याम् – उच्चैर्मूर्धा नास्ति फ.ह. 13. पञ्चमूर्धा इत्यधिकम् क. 14. शब्दाः नास्ति क. 15. प्रमाणीशब्दात् पूरण्यन्तात् ह. 16. भवति नास्ति फ. 17. रात्रयः नास्ति फ. 18. वृत्ति क.